International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(3): 156-158
© 2018 IJSR
www.anantaajournal.com
Received: 29-03-2018
Accepted: 30-04-2018

**Dr. MVB Gangadhara Rao**
HOD, Department of Sanskrit,
K.G.R.L. Degree College,
Bhimavaram, W.G.Dt.,
Andhra Pradesh, India

**Correspondence**
**Dr. MVB Gangadhara Rao**
HOD, Department of Sanskrit,
K.G.R.L. Degree College,
Bhimavaram, W.G.Dt.,
Andhra Pradesh, India

# श्रीरामस्य भ्रातृप्रेमा

## Dr. MVB Gangadhara Rao

श्लो ।। नमःसतां शरण्याय जगन्मड.गलमूर्तये ।
सीता कान्ताय रामाय पवित्राद्भुत कीर्तये ।।

वल्मीकोद्भव रचितं श्रीमद्रामायण महाकाव्यं अत्यन्तरमणीयं आदर्शप्रायं धर्मप्रभोधकं- च ।
श्रीमद्रामायणकव्ये प्रतिपादितानि अनुबन्ध सम्बन्ध बान्धव्यानि मुख्यतः ''श्रीरामचन्द्रस्य भ्रातृप्रेमा'' ।
नान्यतो दर्शनीयानि इति नातिशयोक्तिः ।
''नमो नरायणाय'' इति अष्टाक्षरीमन्त्रात् रा बीजं तथा ओं नमः शिवाय इति पंचाक्षरीमन्त्रात् म बीजं च स्वीकृत्य वसिष्टमहामुनिना दशरथपुत्राय प्रतिपाधितं ''राम'' इति शब्दं च मन्त्रं बभूव। राम शब्दस्य मुनिनां चेतांसि रमयती इति रामशब्दार्थं प्राज्ञैः प्रतिपाधितम् ।

श्लो ।। रामो विग्रहवान् धर्मः, साधुस्सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानामिव वासवः ।।

इति अर्योक्तिः । अर्थात् शिष्टानां अवश्यं आचरणीयाः धर्माः । श्रीरामेण स्वयंसन्दार्भोचितं च अनुष्टीय लोकानां आदर्शप्रायाः धर्मान् प्रति प्रत्यक्षितवान् । अतयेव ''रामवदाचरितव्यम्'' ''धर्मोरक्षति रक्षितः'' इति च आर्योक्ती प्रसिद्धौ बभूवतुः ।

श्रीराम सोदरचतुष्टस्य परस्पर भ्रातृ प्रेम लोकोत्तरं अवश्यं आचरणीयं च ।

''पितृसमोज्येष्ठः'' इति सूक्ति प्रकारेण श्रीरामं प्रति कनिष्ट सोदरैः प्रदर्शितं भ्रातृप्रेमा भक्ति भावं च प्रशंसनीयम् ।
श्रीरामस्यापितेचांप्रति भ्रातृप्रेमा वात्सल्यपूरितम् आदर्शप्रायं च ।
रामायण महाकाव्ये कतिपयमुख्य घट्टेषु प्रदर्शितं श्रीरामस्य भ्रातृप्रेमा कूलंड्.कषं इति ज्ञायते । एतत् पत्रस्य,स्थालीपुलाक न्यायेन प्रदर्शनमेव, प्रतिपादितांशाः ।
कौशिकयागारक्षणार्थं तमनुसृत्य गच्छतां राम लक्ष्मणयोः उपमा अश्विनौ ब्रह्माणं अनुसृत्य इति वाल्मीकिना प्रतिपादितं अत्यन्तरमणीयम् ।

''अनुजग्मतुरक्षद्रौ पितामहमिवाश्विनौ ।।'' (१)

पित्राज्ञया शापत्नीमातुः कैकाया वांचा सिध्यै अरण्यवासाय सीतया सह प्रस्थानाय संसिद्धः ततः भ्रातः ।
''ऐश्वर्यं वापि लोकानां कामयेच त्वया विना'' । छायेव त्वां अनुसृत्य सेवे अहं अहर्निशम् इति लक्ष्मणवाक्यं प्रशंसनीयम्। ततः लक्ष्मणमाता सुमित्रापि ''रामं दशरथं विद्धि, मां विद्धि जनकात्मजां ।
अयोध्यामटवीं विद्धि, गच्छ तात यथा सुखम् । इति सानन्दम् लक्ष्मणयत्नं श्लाघया मास। अनेन प्रकरणेन रामलक्ष्मणयोः घनिष्ट भ्रातृप्रेमा च प्रदर्शितम । ततः श्रीरामः सोदर प्रेमभावेन प्रथमतः नांगी कृत्यापि आत्मानं प्रति लक्ष्मणस्य प्रेमपूर्वक भक्तिभावेन विदितः लक्ष्मणस्यापि आत्मनः सः वनवास गमनं अंगीचकार ।

अनन्तरं मातुलगृहात् प्रति निवृत्तः शतृघ्न सहितः भरतः सीतारामसौ मित्रिणां वनवास प्रस्थानं विदित्वा मातरं प्रति कोपं प्रदर्श्य ''यत्र रामो भवति तथेव अयोध्या'', इति ब्रुवाणः शतृघ्नेन मन्त्रभिस्सः पञ्चवटीं गन्वा रामम ददर्श । सः सैन्यं आगच्छन्तं भरतं दृष्ट्वालक्ष्मणः अन्यधा चिन्तयित्वा प्रकुप्य भरतं निष्टुरोक्तिभिः निन्दयामास । ततः श्रीरामः सौमित्रे ।

भरतं प्रति नान्यथामन्तव्यम् मां प्रति तस्यप्रेमा निरूपमानं अनुसरणीयं च । भरतःमम प्रणैरपि

अत्यैव प्रीतिपात्रः । यदि त्वं भरतं प्रति अप्रियवाक्यानि निन्दावाक्यानि वा अपि ब्रवीति चेत् तत् सर्वं मां प्रति कृता निन्दा इति मन्या । एतानि हितवचना निश्रीरामस्य भ्रातृ प्रेमा सूचितानि ।

ततः भरतः हे अग्रज । मम माता कैकेयीधर्मविरूद्धं इति नज्ञात्वा पितरं प्रति तव वनवासं वरमितियाचे तत् अतीव अनुचितम्। अतः मम प्रर्थनामङ्.गीकृत्य त्वं अयोध्यां प्रति

निवृत्य राज्यं स्वीकृत्य मां प्रति प्रेम प्रकटी कुरु इति प्रार्ययामास । ततः श्रीरामः ''पित्राज्ञा नोल्लङ्घनीया'' इत्युक्त्वा भरतस्य सोदरप्रेमा लोकोत्तरमिति लक्ष्मणाय प्रतिबोध्य भारतमेवं उवाच । हे अनुजः त्वं वसिष्ठादि पूज्यैस्सह निवृत्य अयोध्यां गत्वा मन्त्रिभिः स्सह समालोक्य धर्मबद्धं राज्यं परिपालयं इदमेव आवयोः पित्रुवाञ्चा इति जगाद । भरतोपि ''नाहं राज्यं स्वीकरोमि। परन्तु तत प्रतिनिधि रूपेण नन्दिग्रामे मुनिवृत्तिना वसित्वा राज्यभारं मन्त्रिभारंकरोमि तव पुनरागमनं प्रतीक्ष्यामि इति ।

एतत् वृत्तान्तं राम भरतयोः परस्पर प्रेम भावस्य निदर्शनम् । वसिष्टस्य आज्ञानु

रूपेण श्रीरामस्य पादुकौ राजप्रतिनधि चिह्नरूपेण शिरसि वहित्व सर्वैस्सह निवृत्य मुनि वृत्तिनाजीवनं गमिष्यामि इत्युक्तं भरतस्य वचनं लोकोत्तरं मुनिजनेभ्यः अपि सामोदं आचरणीयम् ।

अरण्यकाण्डे पञ्चदश सर्गे - लक्ष्मणं प्रति रामस्य प्रेमभावमेवं सूचितम् । रामेणएवमुक्तम् वत्स ! सौमित्रे वयं महात्मना अगस्त्यमुनिना सूचितं पञ्चवटीप्रदेशं प्रविष्टाः। सर्व

प्रकरैः अनुकूलं वासयोग्यं च पर्णशालायाः निर्माणंकुरु । ततः लक्ष्मणः हे भ्राः। अहं सर्वदा,सर्वथा तव सेवकोहं, तव मनः प्रसादन योग्यं प्रदेशं सूचय तत्रैवाहं पर्णशाला निर्मातुं प्रेतिष्ये ।इति उवाच । श्रीरामः अपि आत्मानं प्रति प्रदर्शितं प्रेमपूर्वक वाक्यं आकर्ण्य अतीव तुतोष । ततः श्रीरामः प्रेमपूर्वकं तस्यकरौ स्वकरेभ्यः गृहीत्वा नीत्वा च अनुकूलं प्रदेशं तस्मै सूचयामास ।

श्लो ॥ सतं रूचिरमाक्रम्य देशमाश्रम कर्मणि ।
हस्तौ गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥ (२)

भ्रातुः सूचना प्रकारेण बलशाली, शत्रु निबर्हणः सौमित्रिः तस्मिन्नेव प्रदेशे यथा शीघ्रं अन्यन्तरमणीयं आश्रमं निर्मितवान् ।

श्लो ॥ सुसंहृष्टः परिष्विज्य बाहुभ्यां लक्ष्मणं तथा ।
प्रीतोस्मि ते महत् कर्म त्वया कृतमिदं प्रभो! ।
प्रदेयो यन्निमित्तं ते परिष्वङ्.गो मयाकृतः ॥ (३)

श्रीरामोऽपि हे सौमित्रे ! त्वं ममेङ्.गितं परिज्ञाय मम संतोष कारकं आश्रमं शास्त्रप्रकारेण निर्माय मम संतोष जनकं अभवः । धर्मज्ञः त्वं मम सहाय भूतः मया सह आगच्छ तवकर्तव्यम परिपाल्य, पितेव त्वं सर्वदा ममरक्षणं करोसि एतत मम मोदकारणम् । अहर्निशं तव साहचर्येण माम पितादर्शन लोपं नबाध ते ।

श्लो ॥ भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ।
त्वया पुत्रेण धर्मात्मान संवृत्तःपिता मम ॥ (५)

उपर्युक्त श्रीरामवचनैः तस्य सोदरं प्रति प्रेमातिशयं प्रदर्शितम ।

युद्धकाण्डे इन्द्रजिता प्रयुक्तेन नागस्त्रेण मूर्चितं विगतचेष्टं लक्ष्मणं निरीक्ष्य मृतमिति संभाव्य रामेण एवं प्ररुधितं सोदरे लक्ष्मणे विगते सतिअहमपि जीवन्मृत तदा मम जीवने

सर्वमपि सून्यम् । सीतयाऽपि मे किं प्रयोजनम् ? मम अरण्य गमनसमये त्वं मां यथा

अनुसृत्य आगतः तथैव मरणासन्नं त्वां अहमपि अनुसरामि ।

इति लक्ष्मण्मुद्धिस्य दुःखविवशः रूरोध । अस्त्रेणेतेन यदि सौमित्रिः विगतजीवः, भवते तर्हि ममापि एतेन जीवनेन प्रयोजनं नास्ति अहमपि अस्मिन् वानरसमूह समक्षे परित्यजामि । एवद्रामवचनं तस्य सोदर प्रेम चिहनस्य परकाष्ठा ।

श्रीरामः मूर्चितं लक्ष्मणं मृत इति संभाव्य एवं विललाप ।
श्लो ॥ देशे देशे कलत्राणि देशे देशे च बान्धवाः ।
तत् देशं न पश्यामि यत्र भ्राता सहोदरः ॥ (६)

हे लक्ष्मण । अस्मिन् लोके यं यं देशं गतवान् अपि तस्मिन् देशे कलत्राणि लभ्यन्ते । देशे देशे च बान्धवाः अपि लभ्यन्ते । परन्तु यत्र सहोदरः लभते तद्देशं प्राप्तुं बहु दुस्सरम् ।

इन्द्रजितं मृतं ज्ञात्वा अनन्तरं यदा लक्ष्मणः लब्धचेष्टः तदा रामेण एवं प्रकटितम् । वत्स! लक्ष्मण! इन्द्रजिति मृते सति सर्वा राक्षसाः पराजिताः इति भावयामि इत्युक्त्वा लक्ष्मणंव्रीडाबरं स्वगात्रेण परिष्वज्यशिरः आध्राय अत्संगे स्वीकृत्य सम्भावितवान् ।

श्लो ॥ सतं शिरस्युपाध्राय लक्ष्मणं लक्ष्मवर्थनम् ।
लज्जमानं बलात् स्नेहात् अङ्.कमारोप्यवीर्यवान् ॥ (६)
अयंवृत्तान्तं रामस्य सोदर वात्सल्य दर्शने निकषोफलम् ।
अतः श्रीरामस्य भ्रातृ प्रेमा विश्वजनीनम् अवस्यं
अनुसरणीयं च ।

तस्य सोदर प्रेमासर्वतो मुखं सर्व प्राणि समानगतं च - सरयूनद्याः संतरणसमये श्रीरमः नाविकं गुहं निज सोदररूपेण सम्भावितवान् । वनवास समये सीतापहरण अनन्तरं मार्गसन्दर्शितं परोपकारपरायणंजटायुं किष्किन्ध पर्वताग्रे मैत्री भावेन सम्प्राप्त वन्तः वानरान् मुख्यतः सुग्रीव, हनुम जाम्ब वदादि तदित र वानर प्रमुखान् प्रति सेतु निर्माण समये सहायभूतान् नील नलादि वनरान् प्रति चिक्रोड तिर्यक एवं प्रतिच, युद्ध समये सोदरेण निष्कासितं शरणागतं विभीषणं प्रति च दर्शितं शोदर प्रेम भावं रमस्य सर्व जीवान प्रति प्रदर्शितं सौभ्रातृभावस्यउज्ज्वलं तार्काणम् ।

**उपसंहरम् :** बुद्धिजीविनां मनुष्याणां परमावश्यक सुगुणम् सोदरप्रेमा । तस्य चअन्य समाज संवर्धक सुगुणानां च रत्नपेटिका अयं भारतदेशः । अयं अन्य देशवासिनां थ अनुसरणीयं आवस्यकं सुगुणम् । गात्रेषु भिन्नेष्वपि सोदर प्रेमा अन्तरात्मा एकैव इति प्रदर्शितं अस्माकं पुराणेषु सूचितम् । अस्य ज्वलन्तोदाहरणं श्रीरामस्य सोदराणां मध्ये प्रदर्शितं प्रेमानुबन्धम् अन्य जीवलोकस्य अनुसरणीयम् ।

''राम इव आचरितव्यं'' इति सूक्तिः प्रकारेण रामस्य पितृवाक्य परिपालना, धर्मपरिपालनम्, सोदरप्रेमा इति श्रीरामस्य सुगुणाः सर्व मुनुष्यैः आचरितं

यदि तदा अयं मनुष्यजीवनं सर्वदा सौख्यप्रदं शान्तिपूर्वकं अतीवमुधुरं च भवेदिति मम अकांक्षा ।

**उपयुक्त ग्रन्थः, श्लोक शंख्या**


१. आदिकवि वाल्मीकि विरचित श्रीमद्रामायण महाकाव्ये
बालकाण्डा - सर्ग - २२ - श्लो - ८

२. श्रीमद्रमायणम् - अरण्यकाण्डा - सर्ग - १५ श्लो - ७,९

३. श्रीमद्रमायणम् - अरण्यकाण्डा - सर्ग - १५ श्लो - २७,२८

४. श्रीमद्रमायणम् - अरण्यकाण्डा - सर्ग - १५ श्लो - २९

५. श्रीमद्रमायणम् - युद्धकाण्डा - सर्ग - १०२ श्लो - १२

६. श्रीमद्रमायणम् - युद्धकाण्डा - सर्ग - ९२ श्लो - ९